इयम् आकाशवाणी

सम्प्रति वार्ताः श्रूयन्ताम्

दिनाङ्कः 23.06.2026 प्रातः - 06:55

अथ वार्ताः

प्रधानमन्त्री-साक्षात्कारः

भारतस्य द्रुतगत्या वर्धमानस्य, विश्वसनीय-वैश्विकशक्तिरूपेण परिवर्तनस्य प्रेरकशक्तिः राष्ट्र-प्रथमस्य सिद्धान्तः एव अस्तीति प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तम्। नवदिल्ल्याम् एकेन निज वार्तावाहिन्या आयोजिते सम्मेलने सम्बोधयन् प्रधानमन्त्री श्रीमोदी अवदत् यत् विगतदशके देशस्य उपलब्धयः विश्वासे, स्थिरतायां, बृहत्तर-वैश्विक-कल्याणाय प्रतिबद्धतायां च निहिताः सन्ति।

सम्प्रति जी7 शिखरसम्मेलने स्वस्य सहभागितायाः उल्लेखं कुर्वन्, सः अवदत् यत्, राष्ट्रिय-हितं सर्वोपरि स्थापयितुं भारतस्य अविचलप्रतिबद्धतां वैश्विक नेतारः स्वीकृतवन्तः। सर्वकारस्य द्वादश वर्षाणां कार्यकालस्य उल्लेखं कुर्वन्, प्रधानमन्त्री अवदत् यत् स्वच्छभारत, मेक् इन् इण्डिया, खादी-प्रचारः, स्थानीय-उत्पादानां समर्थनं इत्यादयः उपक्रमाः सफलाः अभवन्, येन नागरिकाः राष्ट्रनिर्माणस्य भावम् अङ्गीकृतवन्तः। प्रधानमन्त्री अवदत् यत् सद्यः एव केषुचित् वर्षेषु प्रायः पञ्चविंशति-कोटिशः जनाः निर्धनवर्गात् बहिः आगताः, येन विशालः नवमध्यमवर्गः उद्भूतः, आर्थिकक्रियाकलापः च प्रवर्धितः।

लखनऊ अग्नि दुर्घटना

लखनऊ-नगरे पञ्चदश छात्राणां मृत्योः दुःखद-अग्नि-घटनायाः अनन्तरं द्रुतकार्याचरणस्य अन्तर्गतं आरक्षकाः गतरात्रौ षट् जनानां विरुद्धं एफआईआर पञ्जीकृतवन्तः, तेषु चत्वारः च निगडिताः। मुख्यमन्त्रिणः योगी आदित्यनाथस्य निर्देशानुसारं लखनऊ-विकास-प्राधिकरणस्य, अग्निशामक-विभागस्य, विद्युत्-विभागस्य च चत्वारः अधिकारिणः निलम्बिताः अभवन्। लखनऊ-नगरे अग्नि-घटनायाः सन्दर्भे अलीगञ्ज्-नगरस्य आरक्षकैः बी. एन्. एस्. तथा उत्तरप्रदेश-अग्निशामक-सेवा-अधिनियमस्यान्तर्गतं प्रासङ्गिक-खण्डेषु षट् अभियुक्तानां अन्यान् च उत्तरदायि-जनानां विरुद्धं एफ. आई. आर. पञ्जीकृतम् अस्ति। यत्र ह्यः दुःखद-अग्निप्रकोपः अभवत् तस्मिन् भवने अनधिकृत-निर्माणस्य विषये षोडशाधिक द्विसहस्रतमे वर्षे विध्वंस-आदेशः प्रसारितः आसीत्। परन्तु, मासद्वयाभ्यन्तरे एव आदेशः निरस्तः अभवत्। एतदतिरिच्य, राज्यसर्वकारेण अग्नि-घटनायाः उच्च-स्तरीय-अन्वेषणस्य आदेशोपि प्रदत्तः। घटनायाः अन्वेषणार्थं एस्. आई. टि. इति विशेष-अन्वेषण-दलस्य निर्माणं कृतम्, दलं सप्तदिनेषु एव स्वस्य प्रतिवेदनं प्रदास्यति। ह्यः अपराह्णे दुःखद-अग्निकाण्डे न्यूनातिन्यूनं पञ्चदश जनाः मृताः, तेषु अधिकतया षोडश तः पञ्चविंशति वर्षीयाः छात्राः आसन्। अलीगञ्ज्-नगरस्य पुरैनिया-क्षेत्रे एकस्य आपणस्य उपरि कार्यरते एनिमेशन-कोचिङ्ग-केन्द्रे अग्निप्रकोपः अभवत्, येन छात्रेषु आतङ्कः उत्पन्नः। नव व्रणिताः छात्राः, किङ्ग् जार्ज् चिकित्सकीय-विश्वविद्यालये, के. जी. एम्. यू., लखनऊ इत्यत्र प्रवेशिताः च सन्ति। अधिकांशाः श्वासवरोधेन मृताः।

<u>हज् आवेदन</u>

भारतस्य हज्-समित्या हज- सप्तविंशत्यधिक द्विसहस्रतम वर्षस्य कृते - तीर्थयात्रिभ्यः आवेदनपत्राणि आमन्त्रितम्। नीत्याः विमोचनं कुर्वन्, अल्पसङ्ख्यककार्यमन्त्री किरेन रिजिजुः ह्यः अवदत् यत्, यात्रिणः भारतीय-हज्-

समिति-पोर्टल् तथा हज्-सुविधा ऐप् माध्यमेन च आवेदनपत्राणि ऑन्लाईन-माध्यमेन प्रेषयितुं शक्यन्ते, येन प्रक्रिया अधिका सरला, सुलभा च भविष्यति।

<u>हॉकी</u>

एफ्. आई. एच्. प्रो-लीग् लण्दन्-राऊण्ड् इत्यस्य उद्घाटन-क्रीडायां भारतीय-पुरुष-हाकी-दलम् अद्य पाकिस्तान दलं सम्मुखी करिष्यति। चतुर्विंशत्यधिक द्विसहस्रतमे वर्षे चीनदेशस्य हुलुन्बुईर्-नगरे एशिया-च्याम्पियन्स्-ट्रोफी-स्पर्धायाः अनन्तरं भारत-पाकिस्तान्-देशयोः मध्ये एतत् प्रथमं समागमं भविष्यति।

।।इति वार्ताः।।